यथोक्तं वा प्रसंगात्। यथोक्तं वाजिनचरणं स्यात्। यघयमप्रसंगः अप्रसं
गाद्धेतो स्यात्। स्यप्र स्तप्रसंगः तं त्रमध्ये विधानात्। यदुक्तं तुल्यचोदने इति
।गुणार्थत्वात् चोदनौ नोत्पत्तिचोदनौ। अनुसवनं सवनीयैः पुरोडाशैश्चरं
ति सवने चरंतीत्यर्थः अनुसवनं सवनीये नपशुनाचरंति वर्यपात्प्रातः स राम
६२

सवने १

वनेचरंतिपुरोडाशेनमाध्यंदिने ऽर्धं जैस्तृतीयसवने रूपं गविहारार्थे मेतद्वच
नं। अपराह्णे चैवं चोक्त्वाग्निः। तांसंप्रबोधयंतिते पशुपस्य यःश्याग्नी ध्रमुपसमा
यंतित आज्यानिमस्त्तेऽग्नौ हीत्वाज्यान्यायींत्वा साघाज्यान्यघाराजानमुपा
वहरतीत्यासाधितेषु पाध्रुके घाज्येषु सोमपा चयोजनकाले सवनीयपु
रोडाशा श्वोघंले च अतस्तं च मध्ये विधानात्स्वासंगिक इति सिद्धं ॥ होतृचम
सेनसोमंभक्षयतः इडामुपहूतस्याभक्षणार्थ्यायजमानाः सवनप्राध्येनां को
ति।ततो ध्रुव प्रतिप्रस्थातारो होतृचमसेनकारणाभूतेन सोमं भक्ष तत्राध्व यतः७
र्युः शुक्र ग्रहशेषं होमाभिषवनिमित्तं भक्षयति होतारं प्रतिप्रस्थातारं च यथा
सू६ [illegible] प्रतिप्रस्थाता च मंथिग्रहशेषं होमाभिषवनिमित्तं भक्षयती अध्वर्युहो
तारं च यथा। वाग्देवी भक्षणामंत्रः। होतृपित सिंधुममसे शुक्रमंथिलोतृचम
सवषट्कारनिमित्तं तं त्रैणाभक्षयति। क्रमेणावानसोमेनोच्छिष्टा भवंती
न्ने२ ति स्मरणान्नैव चमसेन सर्वे पिभक्षयंति होतृचमस इति समाख्यानात्
ततो होता ब्रह्म यजमानचमसयोस्तोयषट्वावषट्कारनिमित्तं भक्षयति। त
तो होतृप्रशास्तृब्राह्मणाछंसिपोतृनेष्टृअग्नीध्र चमसेष्वपि वषट्कारनिमित्तं

स्त्रा

दे०म०८ ६३

भक्षयति प्रशास्त्रादीनामध्वर्युं च पश्चात् । ततो होता स्वचमसे समाख्यानिमित्तं
भक्षयति अध्वर्युं प्रतिप्रस्थातारं च पश्चात् । ततो यजमानो स्वचमसे समाख्या
निमित्तं भक्षयतो होतारं पश्चात् । तस्मादुद्गातृचमसं नान्यो भक्षयेदिति उद्गा
तृचमसं च यदुद्गातृप्रस्तोतृप्रतिहर्तार एव भक्षयंति । नान्यः कश्चित् । ततः
प्रशास्त्रादयः स्वस्वचमसे प्रास्थितयागनिमित्तं होतारमध्वर्युं च पश्चात् समा
ख्यानिमित्तं भक्षयंति । ततः पुनरप्युन्नीतेषु प्रशास्त्रादिचमसेषु पंचस्व
ध्वर्युः होतारं प्रशास्त्रादींश्च पश्चात् होमाभिषवनिमित्तं भक्षयति । प्रशास्त्रा म
यश्च होतारमध्वर्युं च पश्चात् स्वस्वचमसे वषट्कारनिमित्तं भक्षयंति । ततः
पुनरप्येवमेव पश्चात् समाख्यानिमित्तं च भक्षयंति । तथा च श्रीमत्सिद्धांतं २
तथार्जिकेरिदयं षभ्दुत्ताहोतृचमसे द्वौ स्तो ब्रह्मस्तु न्वतोऽनुद्गातृगणात्रयः दै
स्वस्व पंच च पंचपंचत्रिवृति ।। हिन्वमेगात्राणि ।। शिवः शिवो मे सप्तऋषी
नुपतिष्ठस्वा ... मेनाभेः सोमेवाङ्गाभिमन्तिगाइति गात्राणि समर्धं स्प च
र्शते । सर्वभक्षेषु भक्षणानंतरं हिन्व मइति मंत्रेण गात्राणि शिरः प्रभृति
पादांतानि स्वान्यंगानि संस्पृशंते भक्षयितारः ।। आप्यायस्वेति द्वाभ्यां चम राम

६३

पर्वे

सानालभंते। भक्षणानंतरं सर्वे चमसिनः आप्यायस्वेति द्वाभ्यां मंत्राभ्यां स्वस्व
चमसानालभंते। भक्षपिता चमसानाप्याययेपुरिति शाखांतरात्। आप्या
यनलिंगेन मंत्रेणाभिमर्शनमाप्यायनमितिकथ्यते। सोमं वासिंचंतेति मंत्रे
णासंभवात्। वाशब्दः पक्षव्यावृत्तौ। आप्यायस्वेति द्वाभ्यां मंत्राभ्यां चौसि म
नः स्वस्वचमसेषु सोमं वासिंचंति। कुतः मंत्रेणाप्यायनस्यासंभवात्। आ
प्यायनं वा शरीरवर्द्धनमुच्यते। तच्च मंत्रेण न संभवति। अतः आभ्यां मंत्रा
भ्यां चमसेषु सोमसेकमेव चमसिनः कुर्युः। स च सोमः पूतभृतः। सका
शादानेयः। तस्य सर्वार्थत्वात्॥ अथ सर्वे भक्षांस्तान् दक्षिणस्य हविर्धानस्य
पश्चाद्दंतं निदधाति चमसान् अधः। ततश्च चमसाध्वर्यवस्तान् सर्वे भक्षांस
शेषानेव पूताप्यायनानन्तरं चमसादिनेव चमसान् हविर्धानमध्ये दक्षिणा
स्य हविर्धानस्य पश्चाद्दंतं च दंतस्य पश्चादधोभूमौ प्राग्ग्रानुदक्संस्थान्नि
प दधाति संस्थापयंति॥ ते नाराशंसाः आवैश्वदेवात्। ते चमसा नाराशंस सं
ज्ञा भवंति आवैश्वदेवात्। बृहस्पतिर्वैश्वदेवं गृह्णाति शुक्रपात्रेणेति ताव
त्पर्यंतमित्यर्थः। संज्ञाकरणं नाराशंसानां चकंपनमित्येवमादौ संव्यव

रे०म०१
६४
64

हारायों । अत एव यज्ञपार्श्वेनु क्रां मरुत्वतीयि मालेंदू रेंघा मैवे ब्रुदे वयोः ना
राशंसाः प्रकथ्यंते यहे घेते सुपंचा स्विति । अथ यच्छविर्धानयो र्नराशंसाः सा
सीदंतीति श्रुतिः ।। पुरोडाशशकलमादाय समुपहूताः स्मा इत्युक्त्वोत्तिष्ठ हू
ति । पुरोडाशशकलमादायाब्रूयुः स्ममुपहूता इत्येवं नुक्त्वोत्तिष्ठतिहो
तुरग्रत ऊर्ध्वाभवत्यच्छावाकं प्रतिगमना[illegible]हविर्धानेमाध्ये च मसनिधा प
नानंतरमेतत्कर्तव्यं । भ हृापिलास मुपहूतास्म इत्युक्त्वोत्तिष्ठतिपुरो
डाशशकलमादायेति श्रुतत्वात् ।। अच्छावाकायैनत्प्रयच्छन्ना होवाकदस्व
ब्रु यंतेवा घमिति । ततः सदसोति क्रम्यसदसः पुरस्तात्स्वाधिष्ण्यस्य पुरस्ता
दुपविष्टस्याच्छावाकस्य समीपमागत्य तेन पुरोडाशकलमच्छावाकायप्र
वा यच्छन्नच्छावाकं प्रत्याह अच्छावाक वदस्व यत्ते वाद्यमित्येवं ब्रुवीतीतच
चैत दुपसन्नो च्छावाको न्याहत दस्मै पुरोडाशशकलं पाराणवाद धदाहाच्छा
वाक वदयस्यंते वाद्यमिति श्रुतत्वात् । ततोच्छावाकोच्छावो अग्निमवसर
त्याहिकं वदति । अध्वर्युस्त चसमी यराचो प विशति । तथा चमानवे नुपवि
श्यपयच्छावाको यथा स्वं धिष्ण्यां बहिःसद इति ।। आश्वलायनसूत्रे । एत स्मि एम

६४

न्कालेप्रपद्याच्छावाकनुन्नरेणाग्नीध्रीयंयतिवृज्यहविर्धानेणसदऽस्मिनोधिष्ण्यदेशेउपवि
शेत्सुरोऽशवगर्त्तप्रत्नमित्तामिवोयम्याच्छावाकवदखेसुन्तऽति।सुपोऽस्मानिति
क्रुवतिहोतारमाहोपलवमयंब्राह्मणऽच्छतेतद्धोतरुपकापस्वेति।ततोच्छावाकेनुपो
ऽस्मान्ब्राह्मणाध्वर्यधं।इत्येवंक्रुवतिपठमानेसत्यध्वर्युहोता।रंप्रत्याहनुपलवमयंब्रा
ह्मणाऽच्छतेतद्धोतरुपकयस्वेत्येवं॥सुपहूतनुन्नीयमानानुवाचयति।होताच्छावा
केनुपहूतेसत्यध्वर्युरुन्नीयमानायानुब्रूहीत्येवमच्छावाकंप्रेष्यति॥अच्छावा
वाचमससमुन्नयति।ततोच्छावाकस्यचमसाध्वर्युर्द्रोणाकलशादच्छावाकचमस
मुन्नयति।सुभयतंशुक्रमच्छावाकचमससमुन्नयतीतिमानवोतेनद्रोणाकलशा
दुपस्तारः।हतभक्तोमध्येसुन्नयनं।पुनर्द्रोणाकलशादभिघारणमित्येवं कर्त्त
व्यं॥होत्राचमसवसर्वमानिर्धायाकला॥वर्त्तमानांकुर्यादितिशवत्तस्याच्छा
वाकचमसस्यहोत्राचमसवसर्वेकर्मकुर्यादानिधानात्दक्षिणस्यहविर्धानस्य
पश्चादन्तेनिधानंयावत।ततश्चैवद्रोणाकलशाच्चमसाध्वर्योरुन्नयनं।ततश्चा
ध्वर्यास्त्वंपलितिजयः।अच्छावाकचमसंगृहीत्वाप्राप्याच्छावाकयजेतिप्रैषः॥
वषट्काराणुवषट्कारयोर्होमः।अनुत्रवान्त्पलितिजयः।अच्छावाकसमीपेग

देवमन्द
६५

स्यास दसोबहिरेवा च्छावाकं प्रत्याध्वर्युरिमां मिथवत्निमि त्रोभ इत्यः। अच्छावाकस्या
प्य ध्वर्युं प्रत्यवबद्धारं समाख्या मिमित्रोभ सो। ततो च्छावाकस्य चमसाप्यायनां
चमसाध्वर्युर्हविर्द्धानमध्येने अग्नेग्नेमसयोम ध्येनि धानं॥ सर्वमाग्नीध्रादतः
अतः परं सर्वं शुचमससंबंधिकार्यं प्रथमच्छावाकचमस आग्नीध्रचमसानस
र्वं तु नयनविधानादि ज्ञेयः आग्नीध्रेन हविर्यज्ञुर्लिंजिरणं प्राप्नंति। अच्छावाकच
मस्य हविर्द्धानमध्येनि धानानंतरमाग्नीध्रे आग्नीध्रं संजकमंडपमध्येहविर्य
ज्ञलिंजरंडं प्राप्नंति। प्र ब्रुव देव अलिक ग्रहणं यजमान दासार्थं। हविर्यज्ञ
विंजो बुस्त होत्र अध्वर्युमे त्रावरुणाग्नीध्रा मे त्रावरुणास्यापि सवनीये उभ
त्तोभवति प्रवानस्विष्टकृद्भागे पुरोनुवाक्या प्रेषयोः पाठे होत्र अध्वर्यु विका
रात। तदुक्तं प्राक् मेत्रावरुणाध्वलोत्र ध्वर्युविकारादिति। इहावसरे यजमानः
सवनीयं नांपुरोडाशादीनां शेषं भक्षयति॥ पत्नी चास्य च्छालायां पत्नी चास्मि
नेव काले शालायांय नी शालामध्येनुपविष्टास्ती अन्यदिडादि हविः शेषाद
न्यद्य द्धविष्यं तुदनाहस्यमु [illegible] स्विकं सेध वसं स्कृतं प्राश्नाति। तदुक्तं काठके राम
आग्नीध्रे पुरोडाशाद्भक्षयति घृतान्यजमानो हविष्यं पत्नीभं क्तो। इतिह ६५

विघ्येतितंलविर्ष्यत्तुदनमुद्धादि। माध्यकोद्रवबरटादिवर्जितं सेधवंचलविरेव।
तऽत्क्तंबुसाॆऽपुगागो। सेधवंलवर्णं यजुय जमानस्य संभवं। पवित्रे परमेष्ठेते
पुत्स हसमपिनिसशः। तथा अन्हारलवणांचैव प्रहस्य हविरुच्यत इति। अन्हा
रलवणांसेधवमानसादीतिव्याख्यातंमसलमंजरीकृता॥ अनुसवनं ब्रह्मणा
सर्प्पयस्वेति प्रेष्यतीतिमानवा। अत्र ऋत्विजोभोजनं कुर्युः तथाच शांखायनः
धि ७ अत्रवृतयंति ऊर्ध्वंवौपासनेभ्य इति॥ तुपविष्टेछावाके १२ ऋतु ग्रहैश्च ऋतु ६
रतः अछावाके सदः प्रविश्य स्वस्यं [illegible] धिष्ण्यस्य पश्चा दुपविष्टे सत्पधर्कुप्र
तिप्रस्थातारावृतु ग्रहैश्चरतः सर्वे सन्ने छावाके ऋतु ग्रहैश्चरतीति श्रु
तेः अत्रेऽभहरोपत्नीयजमानाभ्यामल्लिम्मिश्राशने च कृते मार्जन भागय
रिहरणावाजिनयागप्रणीताविमोकरा हसभागभागवे हणाभागप्राशना
निकर्त्तव्यानि ततऋतु ग्रहप्रचारः। अत्र प्रणीताविमोकात्पूर्वं दक्षिणाग्नौ
केवलापिष्टलेपाहुतिः पिष्टलेपहोमपक्षे केवलाज्याहुतिपक्षेपशो र्दे
क्षिणाग्निहोमानंतरं [illegible]यते। पशुयाबर्हिषस्तु होमो न भवति। तुपदेशाभावा
त् अत्र हर्वैलेनं तिदेशस्याप्यभावादिति नेषु प्रैतेषु प्रातः प्रातःसवनमतन्त्र

द०भ०१ तेर्प्यपि समानमध्वर्याणिति इदं दीक्षितवसनं परिधाय पुरा यजस्य समर्के स्थाप्याद्य
६६ तं गच्छानीति वा कपिश्या यजुर्दोहाणीया प्रायणीयादिवत्सवनीयानामप्यंतस्य
समुच्चयोपवचनात् सर्वेषां चादौ नामधेयकर्मणां सविशाव विद्यमानानामप्य
त्राभावः यशोविद्यमानानां तु प्रासंगिकत्वादेवाभाव इति ॥ अथ यजुषहव
66 चारस्य विधिमुपदिशति ॥ द्रोणकलशात् उपयाम गृहीतोसि मधवे त्वेति
द्वादश प्रतिमंत्रं । उपयामगृहीतोसि मधवे त्वेत्येवमादिभिर्द्वादशभिर्मं
त्रैः प्रतिमंत्रं द्रोणकलशाद्द्वादश ऋतुग्रहान् गृह्णीत । ऋतुग्रहा इति ज्ञापद्रो सं
णकलशात् गृह्णाति तां अ उपयाम्यांगृह्णाति उभयतोमुखाभ्यांपात्रा पा
भ्यां गृह्णातीति श्रुतेः । अन्वर्थसंज्ञाविज्ञानाच्च । ऋतुग्रहाणां पात्र इति
तथा नान्वे द्वादश गृह्णीयादिति श्रुते द्वादशे सुप्तं । प्रतिमंत्रमित्येकेके
न मंत्रेणैकैकमित्यर्थः । परिभाषातः अनुक्तात्पूतभृतो वा विकल्पेन न ग्र
हणं प्राप्ते द्रोणकलशादिति नियमार्थमुक्तं तेन मंत्रविभागमाह ॥
अध्वर्योः सर्वे सर्वोपि मंत्रा अस्मां मंत्रयुग्मानाम् मधवेत्वेत्यादीनां स राम
र्वः सर्वोमित्रोऽध्वर्योः स्यात् । उत्तरतः प्रतिप्रस्थातुः । उत्तरतनुत्तरोमं ६६

त्रः प्रतिप्रस्थातुस्यास्य स्मामपि मंत्रयुग्मानां अथातो गृह्णात्येवोपयामगृ
हीतोसि मधवे त्वेत्येवाध्वर्युस्तूपयामगृहीतोसि माधवाय त्वेति प्रतिप्रस्थातेत्ये
वं सर्वयुग्मेषु व्यस्तत्वात् युगपत्प्रथमो गृह्णीतः प्रथमा ऋतुग्रहावध्वर्युप्रति
प्रस्थातारौ युगपत्सहैव गृह्णीतः उत्तमौ च त्तमौ एकादशद्वादशावृतु
ग्रहौ। तावपि व्यत्यासेन युगपदेव गृह्णीतः सहैव प्रथमौ ग्रहौ गृह्णीतः सहो
नभौ इति व्यस्तत्वात्॥ व्यत्यासं मध्ये द्वितीयैकादशयोर्मध्ये तु यतः
तृतीयप्रभृती दशमपर्यंता अष्टसंख्याः तान्व्यत्यासं व्यत्यस्य व्यत्य
स्य गृह्णाति। न युगपदिति॥ प्रवरणात्पूर्वं सर्वेषां॥ सर्वेषां ग्रहाणामृतुग्र
हाणां प्रचरणं चार्यमाणं च स्थानं च कामं व्यत्यासेनैव भवति पूर्वमध्वर्युः
ततः प्रतिप्रस्थाता। ततः पुनरध्वर्युः पुनः प्रतिप्रस्थातेत्येवं सर्वेषामपि
सव्यत्यासः कथं कर्तव्य इत्यपेक्षायामाह॥ निष्क्रामत्येकः प्रविशतीतरः प्रच
रणाकाले प्रतिप्रस्थाता हविर्धानं निष्क्रामति निः सरति
अपरो हविर्धानं प्रविशतीत्येवं व्यत्यासे निरेवान्यतरः क्रामति प्रा
न्यतरः पद्यत इति श्रवणात्॥ उत्तरमुत्तरं प्रतिप्रस्थातापरकालत्वात्। अ

६७३

तश्च।

दृ०म०९
६७

67

त्रयहणे प्रचरणे च देशतः कालतश्च प्रतिप्रस्थातानुत्तरस्तूत्तरो भवेत् ॥
कुतः अपरकालत्वात् प्रतिप्रस्थातुर्मंत्राणां यच्छाकालीनत्वात् तदुत्तम
ध्वर्योः सर्वं मंत्रमनुत्तरस्तूत्तरः प्रतिप्रस्थातुरिति अनो मंत्राणामपरकाली
नत्वात् प्रचरणमप्यपरकालमेव पुनः मितापरकालत्वादिति केचिता स
एवार्थोस्मिन्नपि पाठे ॥ उभयतोध्वर्युं पयात्रेणापरिपूर्णक्ताति तु भयत
इति हविर्धानान्निष्क्रामंतं हविर्धानेन विशंतं चाध्वर्युं प्रतिप्रस्थाता पा
त्रेणापरिपूर्णक्ताति अव्यवायार्थं पात्रमध्वर्योर्दक्षिणतो हरति स्वयमुत्त
रतो यातीत्यर्थः । तदुक्तं मानवश्रुलादृ हीत्वा च प्रतिप्रस्थाता दक्षिणे काठके च
प्रपद्यमानः प्रतिप्रस्थाता दक्षिणेनाध्वर्योः पात्रं हरेदुत्तर एव संचरेदिति ।
॥ सर्वहुता प्रायुत्तमाभ्यां तु नमाभ्यामेकादशद्वादशाभ्यां प्राग्ये दर्शे हेय
हाःहे सर्वहुताः कार्याः स कृदेव सर्वहोतव्यं अनुवषट्कारोपि न भवति । नानु
वषट्करोतीति मेदत्तनयुवागाजानीति श्रुतेः ॥ [illegible] नेति प्रघुष्यतः आघेषु नु२
षट्स्वृतुग्रहयागेषु [illegible] जुनाप्रेष्यत्येवं मंत्रावरुणं प्रेष्यतः तो वा [illegible] नेति प्र
घ्रंचरेतरति श्रुतत्वात् ॥ जनुभितीति चतुरः पात्रमुखेवियर्यस्यातः त्रमुखे राम
६७

णनाध्वर्युमभिप्रपद्य पात्रं हरति नान्योन्यमभिप्रपद्येत श्लोषे पर्वस्पोसरमभिपदिग ऋीतर इति ७

खविपर्यस्यापात्रमुखयोर्विपर्यासं कृत्वा समसमाख्य नवमदशमे[...]तुय
हयागेषु [...]तुभिः प्रेष्येसेव प्रशास्तारं प्रेष्यत। [...]तुभिरीति चतुर्भिरिति श्रु
तत्वात् तथा च मानवे। [...]तुना प्रेष्येति षड्ऋ प्रेष्येति चतुर्भिर्यथास्तिस्त
था गृहीत्वा [...]तुना प्रेष्येति द्वाभ्यामिति। श्रुतश्च षस्मामग्रे राडोमः। तत
श्चतुस्त्रीयात्रमूलेन लोमायं हस्ते गृहीत्वा तुर्तं [...]योः पुनरग्रे रोव यग्रे लमपि म५
पात्रमुखविपर्यस्यैव कार्यं॥ षड्ऋतुत्रमे। तु समावेकादशद्वादशाब्रह्म
गृहे षड्ऋ प्रचरतः। तेन पात्रयोरयंसाहोमः। ऋतुना प्रेष्येति चरेयेत हतिना
ग्र ग्नितो वा ऋतुने स्युपरिष्टाद्धि श्रवत इति श्रुतेः। तथा तो वा ऋतुनेति च
षू चरयेत तथा त्रे विपर्यस्यते ऋतुभिरिति चतुष्वग्रे खतरथापात्रे विपर्य
स्यते इति श्रुतत्वात्। तकः पुनर्मे चार्थः ऋतुनेत्येव रूपां तृतीयैकवचनात् ऋतु
शब्दयुक्तां याज्यां प्रेष्येत्यर्थः ऋतुनेत्येतत्सदृमयुक्तेन प्रैषेण वा। एवमृ
तुभिः प्रेष्यस्य चापि ऋतुभिरित्येवं रूपायाज्यां प्रेष्येत्यर्थः ऋतुभिरित्येत
दयता प्रैषेण वा॥ यजमानः प्रेषितो होतरेतद्यजेति ब्रूयात्॥ द्वादशे ऋ
तुग्रहे गृहपते यजेत्येवं प्रशास्त्रा प्रेषितो यजमानः होतरेतद्यजेत्येवं

द्र०भ०१
६९

68

ब्रूयात्। ततस्तां यतमानया ज्यां होता ब्रूयात्॥ अध्वर्यं चा। एकादशेऽनुप्रै
प्रशास्त्रा अध्वर्युं यजतमित्येवं प्रेषितोऽध्वर्यु होतरेतद्यजेत्येवं ब्रूयात्।
ततश्च तद्याज्याममिहोतैव ब्रूयात् शाखान्तरे तावि कल्पेन रेन्नुस्लेय शाख यं
वा याज्यापठनमित्येवमुक्तो मास्ति तद्यामानवे॥ एकादशे प्रैषेऽध्वर्युमयं
जतमित्युक्ते तयोरन्यतरो मध्य...स्य परिधेः पश्चादुपविश्य यतोमहेऽग्नि यज्ञा ५
नाध्वर्युं अध्वर्यवा दध्नु नासोमं पिबतां वौषडिति प्रेषेणायजेदध्व वे ६
चाधावेय जामहेऽग्निनापि बतं मधु दीघमौ ध्रुवि वृत ज्ञनु नायज्ञवाहसा
वौषडित्यनवानं यजइति होतरेतद्यजेतिवानप्रेष्यस्तुत्तमे पूषावेति। का
ठके च विशायः द्वारे हविर्धानस्योपविश्याध्वर्युं यजतमित्युक्तोऽग्निनाबध्
पू... अध्वर्यवा दध्नु नासोमं पिबताद्धामिति होतारं वाप्रेष्य होतरेत
द्यजेतिय यध्वर्युं यज्ञेनोक्तेनायहेणा चर्यदिति॥ त्रयोदशं ग्रहं पाध्विष्ठ
नुपयामगृहीतोऽस्यध्वं हंसस्वतयोल्वेति॥ अध्वर्युर्गृह्णन त्रयोदशमम
न्तुयहं गृह्णीयादुपयामगृहीतोऽस्यध्वं हंसस्वतयावेति मन्त्रेण॥ उप
यामगृहीतोऽस्यध्वं हंसस्वतयेत्वेति त्रयोदशं ग्रहं गृह्णातिय ए त्रयोद राम

६९

सग्रहणीयादिति श्रवणात्। प्रतिप्रस्थातारमनुजुहोतीति तं त्रयोदशमध्रु
ग्रहं गृहीतमध्वर्युः प्रतिप्रस्थातारं द्वादशमध्रुग्रहं हुतवंतमनुपश्चाज्जुहो
ति द्वादशस्यैवच वषट्कारस्त्रयोदशेऽप्रसंगाद्दुपाकरोतीति प्राप्तं ऋद्धिदे
वत्यानुहोमप्रस्तावे। अत्र सर्वै[illegible]तुग्रहेषु याज्यामंत्रवत्समानदेवताऽवे
ह ५ याति त्रयं [illegible] चानुक्रमणं [illegible] कर्मं याज्यानां देवताभिधानाम् ऐंद्रीमाहेतीला
पूर्वाग्नेय्यं इमे त्रावरुणी चतस्रो द्रविणोदधस आश्विनं गो [illegible] ष्टत्वद
वता इति तेन इन्द्राय १ मरुद्भ्यः २ त्वष्ट्रे ३ अग्नये ४ इंद्राय ५ मैत्रा
वरुणाभ्यां ६ चत्वारो देवा द्रविणोदसे ७।८।९।१० अश्विभ्यां ११ अ
ग्नये गृहपतय इति द्वादशे त्रयोदशे चार्थन्यायासकलेन देवतैक्या
त्। इति क्रमेणात्यायः।। अन्यतरस्मिं[illegible]षो हुत्वा वशिनैं द्राग्नं [illegible]ति ग ण्ह ५
प्रतिप्रस्थातं द्राग्नी इति। अन्यतरस्मिन्निमं ध्रुवपात्रे वा प्रतिप्रस्थातृ
पात्रे वा गृहीतो [illegible] हुत्वानु[illegible] मयोर्ग्रहयोः शेषो निनीय वशिनार्गेते
न शेषरहितेन जनु पात्रेण प्रतिप्रस्थाता हविर्धाने प्रविश्य [illegible] कल
श्रा [illegible]स्ततो भतो वा परिप्लवया [illegible] द्राग्नं ग्रहं गृह्णाति इति इंद्राग्नी आगत

द०म०१ मिल्यनेनमंत्रेण। अध्वर्युस्तु सदसि जन्तुग्रहशोधव स्पात्रंगृहीत्वाभक्षार्थं
६६ गच्छति। अस्य सशल्व ग्रहत्वाद्धरणिनं तरं परिम अप प्रदक्षिणा कृत्वीतर
याच कृत्वी कृत्वा जन्तुपात्रस्थाने आसादनं कृत्वं ध्यंततः प्रतिप्रस्थापि सर्वं वारे
णानि धूम्यो नरेणाहविर्धानं भक्षार्थं सदस्पा गच्छति। अथ प्रतिप्रस्था
69 ताध्वर्यो: पात्रेणासर्ठं सवमवनयत्याध्वर्यु र्वा प्रतिप्रस्थातुः पात्रेसर्ठं स्व
वमवनयत्यालतति भक्षम थ प्रतिप्रस्थाताभक्षितेनपात्रेणोपांशुग्रहं ग्र
ह्णातीगृति। अथ धाताग्र ह्णात्येवं ह्यग्नी आगतमिति ऋतुत्वात अथ र्नुग्र
हारांभ क्षयितृनाह॥ आहतेभ क्षर्ठं होतर्पोत्रपोत्र्ने ष्ट्रनीधा ब्रह्मणा
च्छर्ठंसिप्रशास्तृभ्यः आघेषुग्र ह्युन्तुग्रहेषु कमेणोत्तेत्रादयः बद्धुषक
ब्रा०१ त्रीरः। तत्र एतेभ्यः [illegible] वब ह्वर्तृभ्योभ क्षणार्महति यघस्यव कारे १५
येननह्रुतं अध्वर्युणा प्रतिप्रस्थावासतेन सहभ क्षयेत स्मिन्नेवपात्रत
त आध्वर्युर्हत्रिासहभ क्षयति। [illegible] प्रतिप्रस्थातापोत्रा अध्वर्युर्नेष्ट्रा।
प्रतिप्रस्थाताग्नीध्रा। अध्वर्युर्ब्र ह्मणाच्छंसिना। प्रतिप्रस्थाताप्रशास्त्रेति॥ राम
विपर्ययस्य पात्रर्ठंहोतृपोतृनेष्टृच्छावाकानां ततः पात्रविपर्ययः स्याग्रहस्ते ६६

ग्रहीत्वा होतृचमसेऽच्छावाकानां भक्षमाहरति। स इमाश्चमसं नवं मद्धशमानां क्रमे
णोते चत्वारो वषट्कारान्तरे। अत एवाध्वर्युर्होत्रा सह भक्षयति प्रतिप्रस्थाता यो त्रा
अध्वर्युर्नेष्ट्रा प्रतिप्रस्थाताच्छावाकेनेति। ननु सर्वहुता प्रायुक्तमाध्या [illegible] मिष्टु
[illegible] त्वाय दितीहि अत्र सर्वेषां भक्षयविधानं कृतमिति चेत्। सत्यं भक्षविधानादेवं क
ल्प्यते वैकल्पिकं सर्वहुतत्वमिति तेनाग्रायणस्य सर्वहुता वा असर्वहुता वेति वक्ष्य
ति च तावद्यावत्सर्वहुतत्वात्पूर्वेषामिति। अतश्च सशेषहोमपक्षे शेषप्रथमभक्षणमेव
पुनर्ग्रहणात् हुतानामानवशेषे सर्वस्योत्तरमभिपरिगृह्णीत इति। अर्थात्संब
न्त्रेपि जनुग्रहः प्रचरितो द्रोणकलशोऽध्वर्ते न साधंते हवें यांशे यांशेष
ग्रहणानामिगृह्णीतः सर्वोध्वर्युर्क्कातिज घन्यः प्रतिप्रस्थातेति। अत्र्वर्कवस
त्रे शेषं संभक्षयता होत्रा नेत्रा नेष्ट्रा धाब्राह्मणाच्छंसिनाग्नीत्रा च हरणेनेती
तरथापात्रं ययस्य होत्रा पोता नेष्टाच्छावाकेनेति यथा सर्वपात्रं त्वाध्वर्युणा
यथालोकं यजमानेचेति। येनैव पात्रमुखे हुतं तेनैव भक्षणं स्यादित्यमिति मं
स्यमाने न विपर्यस्यमुखमित्युक्तं। इदानीमिदं विचार्यते। होतरेत घजेत्व त्र
किंयाज्यामात्र [illegible] पनेष्यतो। नुतवषट्कारेपीति। तत्र यदि याज्यामात्रमपनी क्रि २

दे० भ० ८
७०

यते। तस्य यजमानस्यैव वषट्कारो ऽभिहन्त्रिय यदा चोभयमपनीयते तदा होतुरेवाभ
ह इति। तत्रास्तु त्रैशेषवद्भवत्येव हृतं करोति॥ यावदुक्तं होयजमानयोगादरणावत।
यावदुक्तं याज्यामात्रं [illegible] होतुर्भवति। न वषट्कारः कुतः वरणाव। यजमान
योगात्। यथा वरणं यजमानयोगि अस्मिन् हे देवी नामित्यादिकं एकं वषट्कारोपि
यजमानयोग्ये वा। वषट्कारार्थमेव वरणं श्रूयते यजमानं वा एतद्वृणीते स वक्ता
वषट्करोतीति तस्माद्यजमानस्यैव वषट्कारस्तन्निमित्तोऽभिहन्तोपि यजमानस्यै
वेति सर्वं पक्षः॥ सिद्धान्तमाह॥ कारणाद्धोतृभक्षः वाशब्दस्य पक्षस्य निर्द्धा
रणो हि होतुरेव भक्षो भवति। न यजमानस्य कुतः कारणात्। वषट्कारो हि भक्षस्य
कारणं स च होत्रा कृतः ननूक्तं वरणाव[illegible]कारस्य यजमानयोगादिति यज
मानस्यैव वषट्कार इति अत्रोच्यते न यजमानस्य वषट्कारः। अनवानं यज्य
या अर्द्धं वषट्करोतीति क्लृप्तत्वात् यजमाने च वषट्कर्तृत्वे अनवानं वषट्कृतं न
स्यात्। याज्यायाः होत्रा पठितत्वात्। तस्माद्धोतुरेव वषट्कारस्तन्निमित्तो भक्षस्तथा
वा ननूक्तं वरणाय यायजमानात्रायेतेति तद्भक्षोपि नपियादितित्राह॥ अप्रा
प्तेर्वरणा॥ वरणाय यजमानात्रायेतीति यतत्युक्तमेव कुतः अप्राप्तेः। तदानींवर

राम
७०

70

गाकालेस्मिन्होतुर्वरणां न प्राप्नोतीयतः ॥ नहि तस्य होत्रायणेऽधिकृतः। अतस्तद्
तत्क्रियमाणमप्यनुपकार्यमेव। अथवा यजमानयोरपि वरणं भक्षप्राप्तौ नि
मित्तं भवति। वषट्कार एव हि भक्षस्य कारणं न तु वरणमिति। अप्राप्तेरित्यस्य अ
मानोनाः प्रतिषेध इत्यकारः प्रतिषेधार्थः। एतच्च पदं प्राप्तेरितिपृथगिति।
अथवा चाविभक्तिव्यत्ययेन सूत्रं व्याख्येयं। वरणादप्राप्तिर्भक्षस्येति। विप
र्ययस्य पात्र होतुर्द्विभक्षणं पुनः पात्रमुखं विपर्ययस्य होतुरेव द्विर्भक्षणं वा
रद्वयं भक्षणं भवति। एकादशे द्वादशे च होतुरेव वषट्कर्तृत्वात्। तत्र प्रथमं भ
क्षणाय स्रुगणाद्वितीयं प्रतिप्रस्थात्रे इति येनैव पात्रमुखेन हुतं तेनैव भक्षणं
युक्तमिति विपर्ययस्य पात्रमित्युक्तं ॥ तावद्धा सर्वहुतत्वात्सूत्रं षां काशक्लोवि
कल्पार्थः। अथवा तावदेकादशद्वादशयोरेव शेषस्य द्विर्होतुरध्वर्युप्रति
प्रस्थात्रोश्च सकृदेसेतावदेव भक्षणं भवति तेषामपि प्रथमं मध्वर्योः ततो हो
तुः। ततः प्रतिप्रस्थातुः ततः पुनर्होतुरिति। तावदेव कृतः सर्वेषां दशानामृ
तुग्रहाणां सर्वहुतत्वात्। सर्वहुता हि शाखांतरे समाम्नाताः तदुक्तमाचार्ये
णा सर्वहुताः प्रायुक्तं भ्यामिति। अतस्तेषां शेषाभावादनयोरेव शेषभक्ष

दे०भ०१
७१
71

गाम्निति सर्वे चामसभक्षणां समूच्चकृता शाखांतरात्सूचितां न न्यायात्तस्माद्वि
कल्पएव। आद्यादश र्त्विग्ग्रहाः सर्वं हुत्वा वा असर्वं हुत्वा वेति। तत्र यदा असर्वं हु
तास्तदा सर्वे यजमानः। तत्र निमित्रोत्पन्नि क्रमेणाहोमाभिमवकर्त्तॄणां विभ
क्षणांनि मित्रोत्पन्नि क्रमस्य होमाभिमवकर्त्तुः प्रथमभक्षप्रदेः सर्वे सर्वे हो
मकर्त्तुः पश्चाद्वषट्कर्त्तुरिति। द्रव्यसाधारण्ये च प्रतिभक्षणां सर्वैः सर्वे
ष्वनुपहवप्रार्थनं भक्षणांवनस्तु ग्रहे येन हुतं येन च वषट्कृतं तत्कृत्वमि
मित्रं तयोरेवपरस्परं तत्रायं क्रमः प्रथमं होत्रा सहाध्वर्युः पोत्रा सह प्रति
प्रस्थाता ततो नेष्ट्रा सहाध्वर्युः। ततोग्नीध्रा सह प्रतिप्रस्थाता ततो ब्रह्मणा
च्छंसिना सहाध्वर्युः। ततः प्रशास्त्रा सह प्रतिप्रस्थाता ततः पात्रमुखविपर्य
स्य होत्रा सहाध्वर्युः ततः पोत्रा सह प्रतिप्रस्थाता ततो नेष्ट्रा सहाध्वर्युः ततो
च्छावाकेन सह प्रतिप्रस्थाता। पुनः पात्रमुखविपर्यस्य होत्रा सहाध्वर्युः। पु
नर्होत्रा सह प्रतिप्रस्थाता तत्रोपहवप्रार्थनेयं क्रमः। अध्वर्युः प्रथमं पा
त्रं गृहीत्वा होतारं प्रति प्रस्थातारं पोतारं नेष्टारं प्रतिप्रस्थातारमग्नी राम
ध्रं ब्राह्मणाच्छंसिनं प्रतिप्रस्थातारं प्रशास्तारं होतारं प्रतिप्रस्थातारं यो ७१

तारं नेष्टारं प्रतिप्रस्थातारमच्छावाकं होतारं प्रतिप्रस्थातारं होतारं चेत्येवम
ष्टादशावस्थाततोभक्षयति। एवं होताध्वर्युप्रतिप्रस्थातारं पोतारमध्व
र्युनेष्टारं प्रतिप्रस्थातारमग्नीध्रमध्वर्युंब्राह्मणाच्छंसिनं प्रतिप्रस्थाता
रं प्रशास्तारं अध्वर्युं प्रतिप्रस्थातारं पोतारमध्वर्युं नेष्टारं प्रतिप्रस्थातार
मच्छावाकमध्वर्युं प्रतिप्रस्थातारं चेत्येवं विंशतिसंख्यावस्थाभक्षयति।
एवमनेनैव क्रमेणासर्वे षां स्वनामपरित्यागेनोपहव प्रार्थनम् हनीयं
अत्र द्वादशर्तुग्रहाः तत्र द्वादशहोमकर्तारो द्वादशवषट्कर्तार अत एव
चतुर्विंशतिः तेषां क्रमेणानामानि। अध्वर्युहोताप्रतिप्रस्थातापोता।
अध्वर्युः नेष्टा। प्रतिप्रस्थाता। अग्नीत्। अध्वर्युः ब्राह्मणाच्छंसी। प्रतिप्र
स्थाताप्रशास्ता। अध्वर्युः होता। प्रतिप्रस्थातापोता। अध्वर्युः नेष्टा। प्र
तिप्रस्थाता अच्छावाकः। अध्वर्युः होताप्रतिप्रस्थाता होतेति। तत्रपा
भक्षयति। नस्वनामपरित्यज्य क्रमेणाहोतृमवषट्कर्तृ प्रार्थनं क
र्तव्यं तत्र चतुर्विंशतिसंख्यानां मध्ये अध्वर्युप्रतिप्रस्थात्रभ्यामष्टा
दशैव प्रार्थनीयाः यतस्तयोः षट् स्वनामानि। एकैकस्य षट् सु षट्

दु

दृ०म०१ सुहोमकर्तृत्वात्। एवमेव होतुर्विंशतिः। पोतुर्नेष्टुश्च द्वाविंशतिः। २ अग्नीध्रा
७२ भरताच्छंसिप्रशास्त्राच्छावाकानां त्रयोविंशतिस्त्रयोविंशतिरिति। तथा च
मियुक्तप्ररीतिः सुरारत्नाः श्लोकः होतुर्विंशतिर[illegible]नेष्टपोतुर्नेष्टुर्द्विरुत्तरा दृ ३
त्रिरुत्तरा च तु स्मृतं तु शेषेस्त्वष्टादश[illegible]स्मृतः इति अस्यार्थः होतृत्वं बकारे
72 नुपहवप्रार्थने विंशतिसंख्याः प्रार्थनीयाः कुतः होतुर्हि प्रथमसप्तमैका
दशद्वादशसंख्येषु ग्रहेषु वषट्कर्तृत्वेन चतुर्विंश[illegible]मध्ये चतुर्णां स्व ति ६
मौ नां [illegible]परित्यागात् तथा पोतुर्नेष्टुश्च द्विरुत्तरा द्वाधिका विंशतिः प्रा
र्थनीया कुतः पोतुर्हि द्वितीयाष्टमग्रहयोर्वषट्कर्तृत्वेन द्विस्वना
मपरित्यागात् नेष्टुश्च तृतीयनवमयोर्वषट्कर्तृत्वेन द्विः स्वनामपरित्या
गात् तथा च तुर्णां अग्नीध्रब्राह्मणाच्छंसिप्रशास्त्राच्छावाकानां त्रिरुत्तरा नां ५
त्र्यधिका विंशतिर्नलिजः प्रार्थनीयाः तेषां सजन्महद्वेवषट्करणा
देकैकस्यैव स्वनाम्नः परित्यागात्। तथा शेषे धर्मसुप्रति प्रस्थात्रो[illegible] रा ३
द्गातृणां अष्टादश प्रार्थनीयाः तयोर्हि बज्ञाय सुहोमकर्तृत्वेन यथा राम
रं नात्स्वनामपरित्यागात्। वषट्कृतः प्रथममहपदेष्प्रथमप्रथमैव ७२

सु

यद्धकर्त्रेनामयश्चास्यश्चार्द्धमाभिव्यवपरीतेतिविशेषः। नुपहवसंख्यान्तुसमा
नौ। यदाचद्वादशाहेयष्यास्यषष्ठेहनि स्वयमूत्नुयाजेऽपेतिवचनात् अध्वर्युर्जय
मानयोः स्वयंयाज्यायाठस्तदाहेतुर्द्वाविंशतिरुपहवाः एकादशेयद्वेहोतुःस्था
नेध्वर्योः प्रार्थनंकेचित्तु भक्ताभेदेपिवषट्कर्त्रेहोमकर्त्रेशांव्यवधानेपि
मन्त्रसज्जदेवोपहवप्रार्थनमिच्छंतिपुनरभ्युन्नीतचमसेसुतथैवककीचा
र्यसंप्रदायकारादिभिर्दर्शितत्वात्। मुक्ततरंचैतत्। अन्यत्यातत्रापिप्रशा
स्त्रादीनांद्विर्द्विः वोपहवप्राप्ते। द्वादशाहेचहोतुःस्थानेयजमानस्ये
चिचि ति। अध्वर्योश्चाद्यादशैवोपहवाइति अध्वर्योः स्थानेतु नेतुस्तस्यहोम
कर्तृत्वात्। निर्द्दयपात्रंहोतुःपुरस्तात्प्राङासीनिर्हत्यभक्षित्वापात्रंप्र नमनुः
क्षालनार्थंसदसोबहिर्निःकाश्यहोतुःपुरस्तात्प्राङ्मुखआस्ते। नुपवि
शति। तंवैप्राञ्चमासीनमाह्वयतइतिश्रुतत्वात्। काठके। आह्वयतेहोता
प्राङ्मुखमध्वर्युःसदोबिलआसीनंशोंसावोदैवेतिप्रदक्षिणामावृत्यप्रत्य
ङ्मुखस्तिष्ठन्प्रतिगृणातीति। मानवे। अथैनाहोतारंबहिःसदसःप्राङ्मुखः
प्रतिगरायोपविशत्यध्वर्योशोंसावो ३ इत्युच्यमानेशोंसावोदैवो ३

देःमो६
७३ मा

73

मिति प्रतिगर्योऽवर्त्तते ऋतुपात्रमारभ्योर्ध्वस्तिष्ठन् सदोबिले समानस्वरं
होत्रावसानेषु प्रतिगृणातीति नैव चा अध्वर्युणा होतारं बहिः सदसः प्राङ्मु
खः प्रतिगरणयोग्यविशेषश्च येशंसे । शंसावो ३ सुच्यमाने अध्वर्युस्वराङ्क्षि ख ३
न्प्रतिगृणीयादित्यादिनासंमुखास्तिष्ठन्प्रतिगृणीयादिति लभ्यते ॥ अभि
ष्टुतः शंसेत्यावृत्त्या ओथामोदैवेति प्रतिगृणाति प्रणवावसानयोः हो
त्राशंसावेलायामनेन मंत्रेण प्रतिगरार्थमभिष्टुत आहूतः सन् अध्वर्युर्होतुः
संमुखो भूत्वा प्रणवावसानयोरिति शस्यमानानामृचां प्रणवे अवसा
ने च ओथामोदैवेति प्रतिगृणाति । तदुपयत्येवमयं प्रतिगृणातीति श्रुतत्वा
त् उपपत्त्यप्यावृत्त्या अध्वर्युस्वराङ्क्षि घन्निति रेत सः स्थानीयः संप्रति
गरः सस्वानुकारेण शस्त्रमनाशयेदित्यर्थः एवं पराङ्मुखत्वे स्थाने च
दोषानुक्तः । अमुनाभिमुखोपवेशनेगुणमाह सम्यञ्चो संमुखावित्यादि
ना ॥ इति हरिस्वामिनं तस्माघर्ध्वर्चे [illegible] शं सेद् शेदर्द्धर्चे ऋर्द्धर्चे प्रतिगृणीया
घदियछ्शंसेत् सत्पदे पदे प्रतिगृणीयादिति श्रुतत्वात् । अर्द्धर्चे अर्द्धर्चे
नुष्टुसेदित्यर्थः ओथामोदैवेति प्रतिगरविशेषः शाखान्तरात् । अर्द्धर्चे अ

राम
७३

र्ध्वं चैव इत्युक्तत्वात्प्रणवावसानयोरित्युक्तं ॐ ३ मितिवा। ॐ ३ मितिचा प्रणवाव
सानयोः प्रतिगरणीयात्। तस्मादो ३ मित्येव प्रतिगरणीयादिति श्रुतत्वात्॥ शा
स्त्रांते नित्यं शास्त्रांते शस्त्रसमाप्तावों ३ मित्येव एव प्रतिगरो भवति। नित्यं सर्व
पक्षेपि पुनेकारपक्षेपीत्यर्थः। सवा ॐ ३ मित्येव प्रतिगृणीयादिति श्रुतेः॥
वागंतो वा सर्वः। वाशब्दो विकल्पार्थः। अथवा सर्वे उं ध्यामोदेति प्रतिगरो वा
गंतो वाक शब्दांतो भवति उं ध्यामोदैववागिति। तद्धैक उं ध्यामोदैववागिति
प्रतिगृणंतीति श्रुतत्वात्। सर्वविधानादयं सर्व इत्युच्यते॥ ऐं द्राग्नमा याश्रा
व्याहा होतृ उक्थशाय जसोमस्येति। शास्त्रांते उं ३ मिति प्रतिगीर्य प्रदद्विरणेति
तर याबृहतीश्च्वल्वाहा। विर्धा नमु तरेणागत्वा हविर्धाने प्रविश्य पाद्दर्युरे
गृहमादाया श्राव्या उक्थशायजसोमस्येति होतारं प्रेष्यति। आश्राव्याहेति
ग्रहणां पुरोनुवाक्याव्यावृत्यर्थं॥ एष पैषः सशस्त्राणां सर्वेषां सशस्त्राणां
ग्रहेणामेव सर्वस्तूचो क्तएवप्रैषो भवति नु उक्थशायजसोमस्येत्येवं॥
नाराशंसानां चकंपनं इज्यमाने। नाराशंसा नाराशंस संज्ञानां चमसा
नां वषट्कारे नुवषट्कारे च हूयमाने सशस्त्रे ग्रहे कंपनं वालनं हस्तेन ग्रहीत्वाध्व

हू

दे०भ०ई
७४

हूयनं कुर्वंति चमसाध्वर्यवः अथातिरेकहोमा मानवे । समाशस्त्रोपाह माध्यंदिने च धर्मस्य च
मसाध्वर्यवश्चमसानाश्राव्योच्छशायजसोमस्येति प्रत्याश्राव्य वषट्कृतानुवषट्कृ
ते जुहोति चमसाध्वर्यवोऽग्निश्चमसाननुप्राकुर्वंतीति ॥ अतिरिक्तहोमे मानवे होमाः स
शस्त्रस्याचेतयंति । अनिहितेषु चमसेषु नाराशंसस्थाने अस्थापितेषु सत्सु
शस्त्रस्याहस्यतो मस्तदा चमसानामपि लोमो भवति वषट्कारेऽनुवषट्कारे च
तथा च मानवे प्रतिगीर्य यह माध्यंदिने च चमसाध्वर्यवश्चमसानाश्राव्योच्छा
शायजसोमानामिति प्रत्याश्राव्यति वषट्कृतानुवषट्कृते जुहोति चमसाध्वर्यव
श्चेति । केचिन्निहितेषु वेदिति स्तूच छेदं कुर्वंति । पश्चाद्धुत्तरवेदौ निहितानि
हिताश्च स्यंते तेषु चेत्सशस्त्रस्य होमस्तदा चमसानामपि लोमो भवती
ति व्याख्याति च । एतदपि सम्यगेव नमे व्याख्यानं ॥ भक्षप्रभस्यानिधानां कृ
त्वा २३ ॥ वैश्वदेवं ग्रहाति शुक्रपात्रेण द्रोणकलशादयार होमास
इति ॥ संप्रग्रस्य … ग्रहकारानुवषट्कारयो हुत्वा प्रदक्षिणावृत्तोत्तरथा
व न्तो वषट्कृत्वा जनुपाचेहस्त स्थित एव सदस्यागत्य होतुरग्रेऽनुपविश्य
तस्य ग्रहशेषस्य स्वर्तुपात्रस्थस्य चमसानां च भक्षप्रभृति भक्षणादारभ्या राम ७४

न्निधानात्‌चमसानां हविर्द्धानमधो निधानानंतरं ज्ञात्वा ध्रुकपात्रेण द्रोणाकलशा
द्दोमासस्य श्रेणी धत्तरतिमं चेणावै भवदेवं ग्रहं गृह्णातियजमानिवार्ष्ठे अन्यथा
रधेवासति। अथाचार्यं चामः स्रुवेहोतारं पश्चात्‌ग्रहशेषस्या धर्यो भक्षणं नतो हो
तुः ततश्चमसानां साधारणपात्रादनुप[illegible] येवसर्वे यथा स्वं चमसानसर्वेभ हू ४
क्षाञ्च रुपिवा हर्वेव दाप्याययंति। तस्मान्नाप्यायितांश्चमसीन्दक्षिणस्य
हविर्धानस्य पश्चाद्दक्षभधोनिदधाति ऋतुपात्रेवामध्वर्युर्मार्ज्जालीये प्रक्षाल्य
स्वरे स्वस्थाने निदधाति। तथा चमनवे। ऋतुपात्रे मार्ज्जालीये प्रक्षाल्य याज्या
नेसादयतीति सुत्रकल्पसूत्रभतो वाविकल्पेन ग्रहणोपप्रासंग्रुकाणिति नित्यमार्थे
मुक्तं। अथ यवै स्वदेवं ग्रहं गृह्णाति सुकापात्रेश्वस्थातो गृह्णाति वैमास्य र
ति श्रुतत्वात्‌ अन्वारब्धे वेति शाखांतरात्‌ ग्रहणां च परिपूर्वयात् द्रोणाकलशा
त्सोमम[illegible] दायकार्ये ततः परिभक्ष्य प्रदक्षिणावृत्तो तर यावत्तो कृत्वा ध्रु
कपात्र स्थानेषु यते योनितिसादयति। स्रुकं हुतभक्षाभिर्ध्य द्रोणाकल
शपवित्र योजनं। आसादनानंतरमध्वर्युः स्रुक द्रोणाकलशं [illegible] स्थं सर्वंसो
मं हुतभक्षाभिर्ध्य द्रोणाकलशपवित्र योजनं प्रातः सवनवत्करोति। अथो

हे०भ०१
७५

संप्रत्य संप्रपंचं द्रोणकलशमत्क्षयो पर्युपर्यं संपवित्रमस्मिन्नारोती पूतेनेनप्र
कारेरोत्यर्थः॥ यो भुपुरोडाशात्सवनीयान्निर्वपति यय स्यावर्जं ततोग्नीत
पयस्यावर्जं यय स्यावर्जं पि लायसुपुरोडाशप्रथमं त्सवनीयान्निर्वपति
पसुपुरोडाशः प्रथमोय्यं बांतपसुपुरोडाशप्रथमाः तान्न्रले मान्निखे मेप्र
माग्नेयः पुरोडाशोष्टाकपालः ततरैन्द्र एकादशकपालः। ततइन्द्राय हरिवते
धानाः इन्द्राय पूषण्वते करंभः इन्द्राय सरस्वतिचते दधाति। अत्रापि प्रातःस
वनदेव पुरोगीताः पुरोगीयगतदर्थमेवोपयुक्तमिपात्रागण्यासा घ्रनिः हर्वसंस्क
तामिरेव लर्वैघिपात्रीताच प्रातहकंडमादि पुरोडाशयोश्चम्यताभिधासनाते
अग्ना प्रयोइकेन निनयनं तत्संबंधीनाचसमार्गतिं कुर्यात। प्रातः सवनएवैषामेत्रा
वरुणीयपयस्यावज्ञासाभवतिनेतरयोः सवनयोरितु त्सलालयपस्यावर्जमित्यु
क्तं। मानवेविशेषः। प्रतिप्रस्थाता सवनीयान्निर्वपतिय यावैश्वदेवस्य स्तोत्रो
पाकरणाकाले हविषकृदा ध्येतेति। अतएव कात्यायनेनापि निर्वी पंवि धानानंतर
मेव सौ स्तोत्रमुपाकरोतिसूत्रितं॥ स्तोत्रमुपाकरोतिरणाभ्यांग्रहमुपस्थ
श्यापावर्त्तंध्रुवमिति। द्वाभ्यांदभेत्यरणाभ्यां वैश्वदेवंग्रहमुपस्थश्यापावर्त्ते एम
७५

75

हूँ३

धूमित्यनेनमंत्रेणास्तोत्रमुपाकरोतिप्रस्तोत्रेतरणोप्रयच्छन्नांप्रस्तोत्रेतरणोप्रय
च्छन्सर्वेष्विषुपदेशात्तानुपावर्त्तं धूतितिवाऽन्यानिस्तोत्राणीतिहिनुहातारो
स्यमुपावर्त्तं धूस्तोत्रमित्यर्थः॥ एतंधुर्येष्वसर्वेच सर्वेचसर्वेष्वधुर्येष्वेवमेव
स्तोत्रोपाकरणांकर्त्तव्यंतरणाभ्यांग्रहमुपस्थश्यप्रस्तोतरणोप्रयच्छन्स्तोत्रमु
पाकरोतीत्येतावद्देवंशब्देनलभ्यते। पवमानव्यतिरिक्तानिसर्वाणिस्तोत्राणि
धुर्याणीत्युच्यते धुरिसाधूनिधुर्याणिप्रस्तोत्रेदर्भौप्रयच्छन्नहोपावर्त्तं धूमभि
सर्पयजमानेत्येवंस्तोत्रोपाकरणंपवमानवर्जमितिवैश्वदेवस्तोत्रोपाकर
णानंतरमुद्गातारःस्तुवंते। तदंतेहोतावैश्वदेवंशस्त्रंसंततिवच्चाध्वर्युःप्रवे
वत्प्रतिगरःशस्त्रांतेउक्थमितिपूर्ववत्प्रदक्षिणावृत्तौतरथाहृत्वोकृत्वोत्त
रेणात्वविधानमागत्यहविर्धानेणप्रविश्यवैश्वदेवग्रहमायातिक्रम्याश्र
व्याच्छशायजसोमस्येतिप्रेष्यतिवषट्कारानुवषट्कारयोर्ग्रहहोमः।
पूर्ववच्चमसकंपनंचहविर्वापूर्ववत्प्रदक्षिणावर्त्तनमितरथाचततःसद्दस्या
गत्यहोतारमुपहूयग्रहशेषंभक्षयित्वाहोताप्यध्वर्युमुपहूयग्रहशेषंभक्ष
यतिचमसिनश्चाचमसानुपहूयैवस्वस्वचमसस्थंसर्वेसोमंभक्षयंति। सर्वेभ

हू२ हू१ हू२

सोमग्रहणम्॥ अथ नैवेद्यदेवग्रहभक्षणानंतरं चमसिभिः चमसाः सर्वभक्षाः कार्याः-
॥ मार्जालीये पात्रप्रक्षालनं। भक्षितानां ग्रहचमसरूपाणां पात्राणां मार्जालीये प्र
क्षालनं भवति। ततो ग्रहपात्रं यथास्थानं खरे सादयति। चमसांश्चोत्तरवेदिसमीप
देशेनुख्यांविगच्छति चैधं देवेभ्यस्त्वेति सर्वेभ्यः नुच्छानुच्य स्थालीस्थं सोमं मंत्रे
धं त्रेधा विगच्छति विभज्यो व्यपात्रे गच्छतीत्यर्थः देवेभ्यस्त्वा देवेभ्य इत्यने
न मंत्रेण सर्वेभ्यः प्रशास्तृब्राह्मणाच्छंस्यच्छावाकेभ्यः प्रशास्त्रादिकर्तृकश
के स्तुकशस्त्रकयागाभ्यामार्थमित्यर्थः तं विगच्छति देवेभ्यस्त्वेत्यादि
मंत्रत्वात् चैधं विगच्छति नुच्छा स्थालीसोमं त्रेधा विभज्य च तृतीयं तृतीयभा
गमेकैकस्मिन् ग्रहे नुच्यपात्रे गच्छतीत्यर्थः। प्रथमं प्रशास्तृकर्तृकश
स्त्राव ह्ह्यागार्थं ततो ब्राह्मणाच्छंसिकर्तृकशस्त्र वह्ह्यागार्थं ततोऽच्छा
वाककर्तृकशस्त्र वह्ह्यागार्थमिति। मित्रावरुणाभ्यां त्वेति वा प्रशास्त्रे
वा शब्दो मंत्रविकल्पार्थः अथ वा प्रशास्त्रे मैत्रावरुणाय मैत्रावरुणा
य मैत्रावरुणाकर्तृकशस्त्र वह्ह्यागार्थे नुच्छा स्थालीसुत्पा घतन्स्थ
सोमं तृतीयांश मुच्यपात्रे गच्छति मित्रावरुणाभ्यां त्वेति मंत्रेण मित्रा

वरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव चमसाध्वर्युणापेक्षितत्वा
त्। ननु च मसाध्वर्युणार्थत्वं ग्रहस्यानुपपन्नं यागाभ्यासार्थो हि ग्रहस्या
तूनर्लिङ्गार्थः। तर्हि मेध्वर्युणोन्नायतत्कर्तृकशस्त्रलत्वापिष्यतो। ए
तदप्यनुपपन्नं न हि शस्त्रार्थो ग्रहः किं तर्हि चोत्यापि ग्रहः स्तोत्रं च शस्त्राणि
यागार्थानि। अतश्च मेध्वर्युणोन्नतसंबद्धशस्त्रकोटौ यागाभ्यासोत
मै त्ततेय। सिध्यागाभ्यासे चमसाध्वर्युणां शंसति तस्मै मेध्वर्युणाकर्तृकशस्त्र
वते यागाभ्यासाय एवं गृह्णीयादित्यर्थः॥ तस्मीहं सादनोऽग्रहोत्वा परि
मज्य प्रदक्षिणं नीलर्यावञ्चीज्ञलातस्थो कपाचसस्य स्वस्थाने पूर्वसीसा ... कृष्य
रोति तं वेनोपयामेन गृह्णीयान्न यानो सादयेदिति युक्तत्वात्। ग्रहणानन्तरमेव
स्थाल्यासन्नसीस्वस्थाने सादनं तु स्नी रतीयं निदधातिन सीमेव निदध्यादिति
युक्तत्वात्। अत एव निधानवचनात्। स्थाली हस्तेन गृहीत्वा तन्मुखेनैव रती
यांशस्योपयामे निनयनं मे चेत्ताकार्यं स्तोत्रमुपाकरोति। एवं ग्रह ग्रहीला
साध्वर्युभ्यां ग्रहमुपस्पर्श्यपूर्ववत्स्तोत्रमुपाकरोति इत्येवं तरमेध्वर्युणा च
मससहर्वकं चमसोन्नयनं। ततः स्तोत्रोपाकरणमिति॥ नृच्याशाय जमोमा

दे०भ०९
७७

नामिति प्रैषौ नाराशंसेषु चमसेष्वनाराशंसेषु शस्तृशस्त्र ग्रहस्योच्यशाय
जसोमानामित्येवं न ऊहवचनांतः प्रैषो भवति। तत्र यथा त्रभेदेन बहूनां होमानां सो
मानां होतव्यत्वात् स वशस्त्वाते ग्रहमादाय चमसं धर्त्तुं भिक्षु ममसेषु होमार्थं सले स्ता
ग्रहीतेषु कर्त्रं व्यः ततो ग्रहस्य वषट्कारानुवषट्कारयोर्होमः। चमसानां च ग्र
हहोमानुवषट्कारेनु वषट्कारे च होमः॥ यस्यापि ग्रहस्तस्य प्रथमं चम
समुन्नयति। यस्यापि ग्रहो भवति मैत्रावरुणस्य वा ब्राह्मणाच्छंसिनो वाच्छ
च्छावाकस्य वा चमसं प्रथमं समुन्नयति ग्रह ग्रहणानंतरं नु न्नयनस्य प्र
थमं विधानाच्चमसपि प्रथमं तस्यैव कर्त्तव्यं नुन्नयनार्थत्वाद्विधानस्याच्य
तो मैत्रावरुणकर्त्तृकशस्त्रके नु च्याद्वि ग्रहमैत्रावरुणचमसे प्रथमसमु
न्नयनं। ब्राह्मणाच्छंसिकर्त्तृकशस्त्रुकेवि ग्रहे प्रथमं ब्राह्मणाच्छंसिचम
सोन्नयनं च्छच्छावाककर्त्तृकशस्त्रकेव चवि ग्रहे छावाकचमसस्य प्रथ
मसमुन्नयनमिति॥ ग्रहशेषं ब्रासिन्वासिंचति। ग्रहशेषं होमानंतरं ब्राम्हि
च्छमसेष्वासिंचति यास्मिन्प्रतरं द्यमसमुन्नयनं कृतं तस्मिन्त्रिसदंः। ततः च्छस
दस्यं गत्वा मैत्रावरुणं यथा धर्त्तुं ग्रहहोमनि मि[illegible] त्रंमत्रयति त्रावरुणाच्छ राम
७७

धा मै

मरुत्वचमसे धुर्युमुपहूय वषट्कारनिमित्तं भक्षयित्वा ब्रह्मादिचमसेषु चतान्य
ध्वावषट्कारनिमित्तं भक्षयति। ततः प्रशास्ता स्वं चमसे समाख्यानिमित्तो भ च
क्षो धुर्युं पश्याचमसिनां स्वचमसेषु समाख्यानिमित्तो वषट्कर्ता रंपश्याचम
श्रुमसप्रक्षालनादि सर्वं वृत्त। एवमुत्तरयोरपि विग्रहयोर्नूहनीयं॥ एवं प्रति
रा प्रस्थाता ऐन्द्राग्नं द्रायत्वेति ब्राह्मणाच्छंसिन रैन्द्राग्निभ्यां त्वेत्यच्छावाकाय ए
वमेव प्रतिप्रस्थातोत्तराभ्यां ग्रहाभ्यां प्रचरेत्। एवं शखेनेन त्वच्छभ्यते। नूह्नीस
दनं। यस्यावि ग्रहस्य स्वप्रथमं चमसमुन्नयति ग्रहशेषं चास्मिन्नासिंच
तीति। ग्रहंतु विशेषः रेन्द्रायत्वेत्येनेन मंत्रेण ब्राह्मणाच्छंसिने ब्राह्मणा
च्छंसिकर्तृकशस्त्रवते याताम्यामायग्रहंगृह्णीयात् ऐन्द्राग्निभ्यां त्वेत्ये
न मंत्रेणाच्छावाकाय ग्रच्छावाककर्तृकशस्त्रवते यातायाम्यामायग्रहंगृ
ह्णीयात्। ऐन्द्रायत्वा देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव ब्राह्मणाच्छंसि
ने इति द्वाग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीत्येवाच्छावाकायेति
श्रुतत्वात्। तत्र यावमानवेजवयावि ग्रहैः प्रचरतानुपयामगृहीतोसीमि
त्रावरुणाभ्यां त्वेति गृह्णातस्वधरे स्थात्यासत्तीयमुक्थ्यपात्रेणवतेयामि

कृष्ण

दे०भ०१ ७८ मित्रावरुणाभ्यांत्वेति सादयत्युपयामगृहीतोसि विश्वेभ्यस्त्वा देवायुवं
गृह्णामिपुनर्हविरसीत्युच्चस्थालीमभिमृशति स्तभ्नतो मैत्रावरुणा
चमसमनुख्यानुनयंति सादयत्युपयामगृहीतोसि विश्वेभ्यस्त्वा देवायु
वं गृह्णामि पुनर्हविरसीत्युच्चस्थालीमभिमृशति स्तभ्नतो मैत्रावरुण
78 चमसमनुख्यानुन्नयंति स्नातशस्त्रेभवतो मैत्रावरुणाय प्रतिगीर्य ग्रहमाद
त्तेध्वर्युश्चमसाध्वर्यवश्चमसानामाप्याच्छशायजसोमानामिप्रेष्यति
कृ वषट्कृतानुवषट्कृते जुहोति चमसाध्वर्यवश्च सहृत्वालभ्य देवेभ्यस्त्वा दे
वायुवं पुरायमीलं कं ध्यपात्रेणामैत्रावरुणचमसे संपातमवनयति वा
ग्देवीं जुषाणा सोमस्य पिबत्विति भक्षयंति मार्जालीये प्रक्षाल्य खा
स्थाने चमसा सादयंति प्रतिप्रस्थाता त्वराभ्यां प्रचरत्युपयामगृहीतोसीं
द्राय त्वेति गृह्णासींद्राय त्वेति गृह्णात्युपरिष्टात्पात्र एष ते योनिरिंद्राय त्वेति
सादयति तथैव पुनर्हविष्करोति स्तभ्नतो ब्राह्मणाच्छंसि चमसमनुख्या
नुन्नयंति स्नातशस्त्रे ब्राह्मणाच्छंसी शंसति तस्य चमसे संपातमवनय एम
तिसमानमन्यसवनमभ्यासज्यजीषं जस्माजिनेननिदधाति वा समराजा ७८

शेषं हं संभक्षयतो यथा चमसं भक्षयंति प्रशास्त्र मैत्रावरुणचमसमु~~ख्या~~ रथ्यानुन्नयंत्युच्यपात्र

नं ग्रावस्तुयावहरति माध्यंदिनीयं कलशमाधवनीये सुपर्ध्यायामगृहीतोसि
द्राग्निभ्यां त्वेति गृह्णात्युच्यछावाकः सर्वमुच्यापात्रमपावतेयोनिरिंद्राग्निभ्यां
त्वेति सादयति पुनर्हविष्यकारोस छावाकचमसमुखेषु सर्वं हुतभक्षोछा
कृष्य वाकायप्रतिगीर्यो ऽहं शा इति ब्रूयात्तस्य च मसे संपातमवनयति समन
मन्यादिति। एवमेव काठकोपि सूते प्रनुगवेश्वदेवेन प्रचरति त्रेगोस्य
स्थाल्या गृह्णात्युपयामगृहीतोसि मित्रावरुणाभ्यां त्वेति पुनर्हविरिति छ
स्तो लोमालभ्यस्तोन्नमुपाकरोति श गायत्रहेणा चमसे श्वरसिं देवेभ्यस्त्वे
ति मुखेषु शेषमवनीय शेषं ह संभक्षयतो यथा चमसं भक्षयंति प्रस्तो
स ब्राह्मणाच्छंसि चमसमुख्यानुन्नयत्युच्यपात्रे गोभ्य स्थाल्याग्
हातीत्यादि सोमातिरेकं क्रहोदिति च॥ प्रागच्छावाकविग्रहात्सोमोपाव
हरणं अच्छावाकविग्रहात्प्राक् सर्वत्र सोमोपावहरणं इत्येतत्कालेन।
स यादवताराणां प्रातः सवनवत् कुर्यात्। अगृहीतं एवं तस्मा दछावाकायातं
मो ग्रहो भवस्यथ राजानमुपावहरतीति श्रुतत्वात्॥ वसतीवर्यैकधा सिंच
साधवनीये विश्वेदेवाम रुतरं द्रो अस्मानास्मिन्द्वितीये सवनेन जहुः श्रा

द्रा॰म॰ १०८
७५

79

युष्मं नः प्रियमेधा व दंतो वयं देवानामर्ह स्तुमतो स्यामेति वसतीवरीणाम
हृ माधवनीये अग्निं च तिविश्वेदेवा मरुत इत्यादिना मंत्रेण। अथ च
तीयं वसतीवरीणामवनयतीति श्रुत्यात॥ एकधनानां च। एकधनानां
च सर्वेषामेकधनानामर्धमुदकं त्रमेणाधवनीये वनयेत। पशुवि
शसनमपि केचित्स्वागच्छावाकविग्रहादिच्छंति। अन्ये तु माध्यंदिनस
वनीयानां पात्रसंमार्गेति कुर्वंति तत्र पशुविशसनं हृदयग्रहणा
[illegible] प्रवदाना मुखाम ध्येपृ ड्रे पांतंजलावि: प्रयावयतावि: प्रयु
तस्य हृदयमुत्तमं कुर्वता। दिसर्वं खंड पृषातं कुर्यात्। ततोच्छावाकवि
ग्रहार्थं ग्रहणादिपात्र प्रक्षालनांतं॥ चमितेसर्वे: प्रशास्त: प्रस्तहीति
ब्रूयात्। सर्वैर्वि ग्रहे श्रूयेति सति प्र[illegible]शास्त: प्रस्तुहीत्येवं प्रशास्ता
प्रतिब्रूयात्॥ प्रस्तुतानामर्धं सर्पेणा प्रस्तुतानामर्धसर्पेणा। प्रशास्त्रा प्रस्तु
तानामनुज्ञातानां सर्वेत्विर्जा सर्पणं भवति। सदसि मध्याद्भूमिः कर्म हि
णां ज्वलतीत्यर्थः॥ अत्र सर्पेणा शब्देन निष्क्रमणमेवोच्यते॥ आवश्य राम
कमूत्र पुरीषाद्यर्थं निर्धिष्याय स्थानांतद्भिमवनादि समाम्नातं स ७५

दे॰भ॰९
२०

ध्यंगां दामाध्यंदिनमिति। तदुक्तं काठके सोमातिरेकार्थे प्रशास्तारः प्रसुवेस
त्येयथा प्रस्तोतारः सर्पेति संतिष्ठते प्रातःसवनमिति। मानवे चा प्रशास्तः
प्रसुवेति प्रेष्यति प्रसूताः सर्पंतीति माध्यंदिनाय प्रसर्पंतीति सवनादेः सर्प
णं पृथग्विहितमस्ति। तथा च छंदोगसूत्रं। सर्वैः सहैतासु प्रशास्त्रोन्नाय न
थेतमपरमाद्वारा निष्क्रम्य पश्चिमेनाग्नीध्रीयं गत्वा बहिर्वेदि मूत्रं कुर्यु
रिति। तथा वा च वयस्य छे पुर्यो वक्ष्यः यावदकृतशौचाः स्युस्तावद्गु
[illegible]न्यमनं कुर्युरोपस्पर्शनात्। एतन्मगतौ थं। तेनन भूयः शम्याराम्या स्थ प
युः यो भूयो निगमिष्येदप्राने न गच्छसेदिति। [illegible]। अथ धिष्ण्यानुपतिष्ठे
र समस्तेनोवरयोः सवर्योरितिय इति निष्क्रमणानंतरं मूत्रादि कुर्वेति तदाजत
शौचा धिष्ण्यानुपतिष्ठंतिते। यदि न कुर्युस्तदा यथोक्तेन विधिना निष्क्रम्या
थानंतरं धिष्ण्यानुपतिष्ठेरन्। तथा। एवमेव निष्क्रम्य पथ स्तोत्रेभ्यः सम
स्तेनोपतिष्ठेरन्यान्सू ध्वमु [illegible]न्परतिष्ठा। पर्यायेभ्यस्तु रात्रिरिति। छिर कृष्ये ४
भ्यासोध्यायसमाप्तिसूचनार्थः॥ १४ इति श्री श्री संस्थापतित्रिग्निचि र
न्महायाज्ञिक श्री श्री प्रजापतिसुतेन महायाज्ञिक श्री श्री देवदत्तेन रचिते कात्या राम
यनसूत्रव्याख्याने नवमोऽध्यायः॥ समाप्तः॥ शुभमस्तु श्रीशं संवत् १९२१॥ २०